## सुञो यज्ञसंयोगे। (१३२/३११२)

यज्ञेन संयोगः यज्ञसंयोगः। [1]यज्ञसंयुक्तेऽभिषवे वर्तमानात् [2]सुनोतेर्धातोः शतृप्रत्ययो भवति। सर्वे सुन्वन्तः। सर्वे यजमानाः सत्रिण उच्यन्ते। [3]संयोगग्रहणं [4]प्रधानकर्तृप्रतिपत्त्यर्थम्। याजकेषु मा भूत्। यज्ञसंयोगे इति किम्? सुनोति सुराम्॥

## अर्हः प्रशंसायाम्। (१३३/३११३)

प्रशंसा स्तुतिः। अर्हतेर्धातोः प्रशंसायां[5] शतृप्रत्ययो भवति। [6]अर्हन्निह भवान् विद्याम्। अर्हन्निह भवान् पूजाम्। प्रशंसायाम् इति किम्? अर्हति चौरो [7]वधम्॥

## आ क्वेः तच्छीलतद्धर्मतत्साधुकारिषु। (१३४/३११४)

'भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' (३.२.१७७/३१५७) इति क्विपं वक्ष्यति। आ एतस्मात् क्विप्[8]संशब्दाद् यानित ऊर्ध्वमनुक्रमिष्यामस्तच्छीलादिषु कर्तृषु ते वेदितव्याः। अभिविधौ चायम् [9]आङ। तेन क्विपोऽप्ययमर्थनिर्देशः। तदिति धात्वर्थः शीलादि[10]विशेषणत्वेन निर्दिश्यते। तच्छीलो यः स्वभावतः फलनिरपेक्ष-स्तत्र प्रवर्तते। तद्धर्मा तदाचारः, यः [11]स्वधर्मे ममायमिति प्रवर्तते विनापि शीलेन। तत्साधुकारी यो धात्वर्थं साधु करोति। उत्तरत्रै[12]वोदाहरिष्यामः॥

## तृन्। (१३५/३११५)

सर्वधातुभ्यः तृन्प्रत्ययो भवति [13]तच्छीलादिषु कर्तृषु। [14]नकारः स्वरार्थः। तच्छीले [15]तावत्–कर्ता कटान्। वदिता जनापवादान्। तद्धर्मणि–[16]मुण्डयितारः श्राविष्ठायनाः भवन्ति वधूमूढाम्। अन्नमपहर्तारः आह्वरकाः भवन्ति श्राद्धे सिद्धे[17]। [18]उन्नेतारः तौल्वलायनाः भवन्ति पुत्रे जाते। तत्साधुकारिणि–कर्ता[19]कटम्। गन्ता [20]खेटम्।

[२७४] तृन्विधावृत्विक्षु चानुपसर्गस्य (म. भा. २.१३०)।

हो॑ता। पो॑ता। अनुपसर्गस्य इति किम्? उद्गाता। प्रतिहर्ता। तृजेव भवति। स्वरे विशेषः।

[२७५] नयतेः षुक् च (म. भा. २.१३०)।

ने॑ष्टा।

---

1. यज्ञसंयोगे अ. फ. 2. सुञः फ. 3. संयोगोपाधिग्रहणम् फ. 4. प्रधानकर्तृत्वसंप्रत्ययार्थम् फ, प्रधानभूतकर्तृत्वप्रत्ययार्थम् क, प्रधानकर्तृसंप्रत्ययार्थम् ब. ड. 5. विषये इत्यधिकम् फ. ड, प्रशंसायाः विषये क. 6. उदाहरणमिदं नास्ति अ. फ. 7. वधम् नास्ति फ, बन्धम् क. ड. 8. शब्दनात् फ. 9. आङकारः फ, आकारः अ. ब. क, आङ नास्ति ह. 10. °विशेषणत्वे ह.व.क.ड. 11. स्वधर्मो अ.ब.क.ड. 12. एव नास्ति अ. 13. ताच्छील्यादिषु ब.फ. 14. ञकारः ड. 15. न चेत् कर्ता क. 16. मुण्ड इति क्विप् इत्यधिकम् फ. 17. सति इत्यधिकम् अ. ड. 18. उन्नेतारः नास्ति क.ड, तौल्वलायनाः नास्ति ग, भवन्ति नास्ति फ. 19. विकटम् अ.क. 20. खेलम् ड.